# मयूर स्कूल, अजमेर
## संस्कृतम् / अष्टमी / वार्षिक परीक्षा / शनिवासरः / मार्च 7, 2009
## अवधिः– होराद्वयम् (दो घण्टे)

डीडीपी–150 | पी.आर.वी.–अष्टमी अ,ब

पूर्णांकाः– 100 | डीडीपी–अष्टमी स

**ध्यातव्यम्** :–1. प्रश्न पत्रे 10 प्रश्नाः 3 मुद्रित पृष्ठाः, च सन्ति।
2. सर्वे प्रश्नाः अनिवार्याः सन्ति।

प्र.1 निम्नलिखित–अंशानां सप्रसंगं हिन्दी–अनुवादं कुरुत :– (5x4+2=22)

(क) चंचलः वृक्षम् उपगम्य अपृच्छत्। वृक्षः अवदत्–'मानवाः अस्माकं छायायां विरमन्ति। अस्माकं फलानि खादन्ति, पुनः कुठारैः प्रहृत्य अस्मभ्यं सर्वदा कष्टं ददति। यत्र कुत्रापि छेदनं कुर्वन्ति। धर्मे धमनं पापे पुण्यं भवति एव।'

(ख) सा सहसा चंचलमुपसृत्य कथयति – ''का वार्ता ? माम् अपि विज्ञापय।'' सः अवदत् – ''अहह मातृस्वसः। अवसरे त्वं समागवती। मया अस्य व्याघ्रस्य प्राणाः रक्षिताः, परम् एषः मामेव खादितुम् इच्छति।'' तदनन्तरं सः लोमशिकायै निखिलां कथां न्यवेदयत्।

(ग) प्रेमलीं चावदत्–प्रेमलि! अद्य खलु भृशं श्रान्तोऽस्मि। मह्यं जलम् उष्णं कृत्वा देहि। अहं स्नात्वा तस्मिन् जले चरणौ स्थापयामि। तेन मम श्रान्तिः अपगमिष्यति। प्रेमली अवदत्–तवानुरोधं कथमहम् अस्वीकुर्याम? पश्य, तत्र हण्डी उपरि स्थापिता।

(घ) प्रेमलः हण्डीं संस्थाप्य शरीरं हस्तेन संस्पृश्य अकथयत्– अरे, कीदृशं पुष्पमिव शरीरं लघु जातम्। यदि त्वं प्रतिदिन एवमेव जलम् उष्णं कृत्वा मह्यम् ददासि तर्हि कियत् शोभनं भवेत्। प्रेमली अवदत्–किमहं न इति कथयामि? परन्तु अत्र कस्य आलस्यम्?

(ङ) लोमशिका चंचलम् अकथयत् – बाढम्, त्वं जालं प्रसारय। पुनः सा व्याघ्रम् अवदत्–केन प्रकारेण त्वम् एतस्मिन् जाले बद्धः इति अहं प्रत्यक्षं द्रष्टुमिच्छामि। व्याघ्रः तद् वृत्तान्तं प्रदर्शयितुं तस्मिन् जाले प्राविशत्। लोमशिका पुनः अकथयत्–सम्प्रति पुनः पुनः कूर्दनं कृत्वा दर्शय।

प्र.2 (क) अधोलिखित–प्रश्नानां उत्तराणि संस्कृते लिखत – (5x1=5)
(i) विस्तृते जाले कः बद्धः आसीत्?
(ii) प्रेमलः कदा गृहम् आगच्छत्?
(iii) प्रेमली कस्य पत्नी आसीत्?
(iv) सततं किं करणीयम्?
(v) श्रीधर भास्कर वर्णेकरः कीदृशः कविः मन्यते?

(ख) निम्नलिखित–प्रश्नानां उत्तराणि संस्कृते लिखत – (2x2=4)
(i) जलं पीत्वा व्याघ्रः किम् अवदत्?
(ii) प्रेमलः कानि प्राज्वालयत्? सः चुल्लीं प्रज्वालयितुं किम् कृतवान्?

प्र.3 निर्देशानुसारं–उत्तराणि लिखत –
(i) पदेषु उपसर्गं चित्वा पृथक् कुरूत – (क) अवतारय (ख) उपहारः (2)
(ii) पदेषु धातुं प्रत्ययं च पृथक् कुरूत – (क) गत्वा (ख) द्रष्टुम् (2)
(iii) समानार्थक पदं लिखत – (क) करेण (ख) साम्प्रतम् (2)
(iv) विलोमपदं लिखत – (क) अनुरक्तिः (ख) स्वकीयम् (2)
(v) उचितकथनानां समक्षम् 'आम्' अनुचित कथनानां समक्षं 'न' इति लिखत – (2)
(क) स्वकीयं बलं बाधकं भवति ( )
(ख) सदैव अग्रे एव चलनीयम्। ( )

(ग) व्याधस्य नाम चंचलः आसीत् ( )
(घ) गमनं सुकरम् अस्ति। ( )

(vi) अशुद्धं वाक्यं शुद्धं कुरूत – (2)
(क) विद्यायाः सदृशं किमपि नास्ति।
(ख) अध्यापकस्य परितः छात्राः सन्ति।

प्र.4 (क) शब्दरूपाणि लिखत – (3)
1. 'जननी'– शब्दः – द्वितीया विभक्तिः
2. 'प्रभु' शब्दः – चतुर्थी विभक्तिः

(ख) धातुरूपाणि लिखत – (3)
1. क्रीड् धातुः – विधिलिङ्लकारे – प्रथमः पुरूषः
3. धाव् धातुः – लोट् लकारे – उत्तमः पुरूषः

प्र.5 (क) शब्दरूपैः रिक्तस्थानानि पूरयत – (2)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| (i) | .................................. | .................................. | मुनिषु |
| (ii) | मया | .................................. | .................................. |

(ख) लट्लकारपदेभ्यः लङ्–लृट् लकारपदानां निर्माणं कुरूत – (2)

| लट्लकारे | लङ् लकारे | लृट् लकारे |
|---|---|---|
| (i) गच्छति | .................................. | .................................. |
| (ii) वदामि | .................................. | .................................. |

(ग) विभक्ति–वचनं च लिखत – जालात्, कुठारैः (2)

(घ) सन्धिं कृत्वा लिखत – (2)
(i) प्रति + आ + अवर्तत – ..................................
(ii) बुभुक्षितः + अस्मि – ..................................

(ङ) संस्कृते अधोलिखित – अंकानां संख्यावाचक शब्दान् लिखत – (2)
12, 40, 25, 16

प्र.6 संस्कृते अनुवादं कुरूत – (11)
(क) छात्र अध्यापिका से पाठ पढ़ेंगे।
(ख) सज्जनों का धन दान के लिए होता है।
(ग) पिता पुत्र को किताब देता है।
(घ) मैं गाँव की ओर गया था।
(ङ) नगर के दोनों ओर वृक्ष हैं।
(च) तुम सब खेलो।

प्र.7 अधोलिखितं अपठितगद्यांशं ध्यानेन पठित्वा उत्तराणि लिखत –
भारतम् अस्माकं मातृभूमिः। भारतस्य उत्तरदिशायां हिमेन आच्छादिताः पर्वतश्रृंखलाः राजमुकुटम् इव सुशोभिताः सन्ति। भारतस्य अंके जल पूर्णाः नद्यः क्रीडन्ति। दक्षिणदिशायां हिन्द–महासागरः एतस्य चरणौ प्रक्षालयति। भारतस्य उर्वरा भूमिः शस्य–श्यामला अस्ति। चन्दन वृक्षैः सुगन्धितः वायुः अस्य पावन भूमौ वहति। षट् ऋतवः एतं देशं मनोरमं कुर्वन्ति। अत्र अनेकाः भाषाः, विविधाः संस्कृतयः, विभिन्नाः वेशभूषाः

प्रचलिताः सन्ति। भारतस्य वैज्ञानिकाः, गणितज्ञाः, चिकित्सकाः, कलाकाराः च स्व स्व क्षेत्रेषु श्रेष्ठाः सन्ति। मातृभूमेः समृद्धये, हिताय, रक्षणाय च वयं सर्वदा कृतसंकल्पाः स्मः।

(अ) उपर्युक्त–गद्यांशस्य हिन्दी अनुवादं लिखत। (5)

(ब) अधोलिखित–प्रश्नानां उत्तराणि संस्कृते लिखत– (3)

(i) भारतस्य अंके काः खेलन्ति?

(ii) भारते कति ऋतवः भवन्ति?

(iii) भारतस्य भूमिः कीदृशी अस्ति?

(स) उचितशब्दैः रिक्त स्थानानि पूरयत – (2)

(i) चन्दनवृक्षैः .................. वायुः भारतयस्य ........................ वहति।

(ii) वयं मातृभूमेः ......................., हिताय, .................... च कृतसंकल्पाः स्मः।

प्र.8 (क) मंजूषातः उचितपदानि चित्वा, रिक्तस्थानानि च पूरयित्वा महात्मा गाँधीविषये अनुच्छेदं पूरयत– (3)

| **मदिरापान, दृढ़निश्चयः, इंग्लैण्डनामकं, बाल्यकाले, देशसेवायां, सत्यं** |
|---|

महात्मागाँधी...................... अतीव सरलः बालकः आसीत्। स सदा .................... वदित स्म। सः वाक्कीलशिक्षायै .................... देशम् अगच्छत्। तत्र मांसभक्षण, ....................., धूम्रपान–परित्यागस्य च स्वजनन्याः समक्षं कृतां प्रतिज्ञां पूर्णतया अपालयत्। स्वदेशं प्रत्यागत्य सः .................... संलग्नः अभवत्। परतन्त्र भारतस्य स्वाधीनतायै सः .................... प्रयत्नशीलः च आसीत्।

(ख) मंजूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – (3)

| **वृद्धः, नद्याःजलेन, लोमशिका, सदा, विधेहि, काष्ठच्छेदेन** |
|---|

(i) बदरी–गुल्मानां पृष्ठे ........................... निलीना आसीत्।

(ii) व्याघ्रस्य पिपासा ........................... शान्ता अभवत्।

(iii) सत्यम् ......................... जयते।

(iv) राष्ट्रे अनुरिक्तं .............................।

(v) प्रेमलः ......................... श्रान्तः आसीत्।

(vi) वने एकः ...................... व्याघ्रः आसीत्।

प्र.9 'सदैव पुरतो निधेहि चरणम्' कवितायाः द्वौ अनुच्छेदौ (दो अनुच्छेद) क्रमानुसारं लिखत। (8)

प्र.10 चित्रं दृष्ट्वा मंजूषातः समस्त पदानि च चित्वा त्रीणि वाक्यानि (तीन वाक्य) रचयत – (6)

| सूर्यः, बालाः, विद्यालयं, उदयति, देवालयं, गच्छन्ति, भक्तः, स्नात्वा, प्रातःकाले, पठनाय, पूर्वादिशायाम्, गच्छति |
|---|

